**दिनाङ्कः 04.03.2026** **प्रातः - 06:55**

## प्रधानमन्त्री-दूरभाषवार्ता

प्रधानमन्त्री नरेन्द्रमोदी ह्यः पश्चिम-एशिया-द्वन्द्वस्य विषये कुवैत, कतर्, ओमान् देशानां नेतृभिः सह वार्तालापं कृतवान्। दूरभाष-माध्यमेन वार्तालापावधौ श्रीमोदी एतेषां देशानाम् सार्वभौमत्वस्य, क्षेत्रीय-अखण्डतायाः च उल्लङ्घनस्य दृढतया निन्दाम् अकरोत्। सः भारतीयसमुदायस्य सुरक्षायै कल्याणाय च तेषां निरन्तर-समर्थनस्य प्रशंसामपि अकरोत्। क्षेत्रीयशान्तेः स्थिरतायाः च यथाशीघ्रं पुनःस्थापनाय संवादस्य कूटनीतेः च महत्त्वम् अपि प्रधानमन्त्रिणा प्रतिपादितम्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदिना लिखितं यत् कुवैत-देशस्य युवराजेन शेख् सबा-अल्-खालिद्-अल्-हमद्-अल्-मुबारक्-अल्-सबाह् इत्यनेन सह वार्तालापः अभवत्। अस्मिन् दुष्करसमये भारतं कुवैत्-देशस्य जनैः सह वर्तते इति श्रीमोदी अवदत्। प्रधानमन्त्री कतर्-देशस्य अमीरेण शेख् तमीम् बिन् हमद् अल् थानी इत्यनेन सह अपि वार्तालापं कृत्वा कतर्-देशेन सह दृढं ऐक्यं प्रकटितवान्। श्रीमोदी ओमानस्य सुल्तानेन हैथम् बिन् तारिक् इत्यनेन सह अपि वार्तालापं कृत्वा पश्चिम-एशियायाः वर्तमान-स्थित्याम् अपि विचाराणां आदान-प्रदानं कृतवान्। विदेश-मन्त्री डा. एस्. जयशङ्करः ह्यः यूरोपीय-सङ्घस्य विदेश-कार्यस्य तथा सुरक्षा-नीतेः उच्चप्रतिनिधिना कजा कल्लास इत्यनया सह गल्फ्-क्षेत्रे वर्धमानस्य संघर्षस्य विषये दूरभाष-माध्यमेन वार्तालापम् अकरोत्।

## पश्चिम एशिया-संवाद

भारतेन पश्चिम-एशियायां विद्यमानस्य संघर्षस्य विषये संवादस्य कूटनीतेः च आह्वानम् दृढतया प्रतिपादितम्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः एकस्मिन् वक्तव्ये अवदत् यत् भारतं विवादस्य शीघ्रसमाप्तेः पक्षे स्पष्टतया स्वरम् उत्थापयति। सः नष्टानां अनेकेषां जीवनानां विषये दुःखम् प्रकटितवान्। प्रवक्ता अवदत् यत् गल्फ्-क्षेत्रे निवसन्तः कार्यं च कुर्वन्तः प्रायः एककोट्यधिकाः भारतीय-नागरिकाः सन्ति, तेषां सुरक्षायाः कल्याणस्य च सर्वोच्चप्राथमिकता अस्ति। व्यापार-ऊर्जा-आपूर्तिशृङ्खलाः अपि अस्मात् क्षेत्रात् एव गच्छन्ति इत्युक्त्वा जायसवालः अधोरेखितवान् यत् केनापि व्यवधानेन भारतीय-अर्थव्यवस्थायां गम्भीरः प्रभावः भविष्यति। तेहरान्-नगरे वर्धमान-सङ्कट-धारणया, ईरान्-देशस्य भारतीय-दूतावासेन तेहरान्-नगरे स्थितेभ्यः भारतीय-छात्राः नगरात् बहिः सुरक्षितस्थानेषु स्थानान्तरिताः। एयर्-इण्डिया-संस्थायाः प्रथमं विमानयानं दुबई -नगरात् नवदेहली-नगरं प्राप्नोत्। सामाजिक-पटले एयर्-इण्डिया इत्यनेन लिखितम् यत् अस्मिन् विमाने ऊनपञ्चाशदधिकैकशत यात्रिणः, अष्ट चालकदलस्य सदस्याः च आसन्।

## उड्डयन-मन्त्रालयः

नागरिक-उड्डयन-मन्त्रालयः सूचितवान् यत् पश्चिम-एशियायाः केषुचित् भागेषु वायुक्षेत्राणां परिवर्तनेन, भारतीय-विमानानां द्वादश-शताधिकानि विमानानि, विदेशीय-विमानानां प्रायः अशीत्यधिकत्रिशत-विमानयानानि च निरस्तानि सन्ति इति।

## होली

रङ्गानां पर्वः होली-उत्सवः अद्य सम्पूर्णे देशे आचर्यते। एषः उत्सवः अशुभस्य उपरि शुभस्य विजयं सूचयति, वसन्तऋतोः आरम्भोपि सूचयति। राष्ट्रपतिः द्रौपदी मुर्मुः वर्या अस्मिन् अवसरे देशवासिनां कृते शुभाशयाः प्रदत्तवती। स्वस्य सन्देशे राष्ट्रपतिः अवदत् यत् अयं उत्सवः समाजे प्रेमस्य आशायाः च प्रसारं करोति तथा च सामाजिक-समन्वयस्य भावं सुदृढं करोति। लोकसभायाः अध्यक्षः ओम् बिरला-वर्यः अपि नागरिकाणां कृते शुभकामनाः प्रेषितवान्। अत्रान्तरे, अद्य होली-उत्सवस्य अवसरे, राष्ट्रिय-राजधान्यां सुगम-यातायात-प्रबन्धनार्थं देहली-यातायात-आरक्षकैः विस्तृत-व्यवस्था कृता अस्ति। अपर-आरक्षक-आयुक्तः दिनेशकुमारगुप्तः ह्यः प्रसार-माध्यमैः सह वार्तालापं कुर्वन् एतत् उक्तवान्।

## बैडमिण्टन-क्रीडा

ह्यः सायङ्काले बर्मिङ्घम्-नगरे ऑल-इंग्लैण्ड-बैडमिण्टन-चैम्पियनशिप प्रतिस्पर्धा समारधा। पुरुष-एकलस्य आरम्भिके चक्रे लक्ष्यसेनेन चीनदेशस्य शि युकी इत्यमुं पराजितम्।